# Shivastuti by Brahma and Vishnu

# ब्रह्माण्डमहापुराणे ब्रह्माविष्णूकृता शिवस्तुतिः

## Document Information

Text title : Brahmavishnukrita shivastutiH from brahmANDamahApurANa

File name : brahmAviShNUkRRitAshivastutiH.itx

Category : shiva, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Latest update : November 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 21, 2023

*sanskritdocuments.org*

# ब्रह्माण्डमहापुराणे ब्रह्माविष्णूकृता शिवस्तुतिः

नमोऽस्तु ते लोकसुरेश देव नमोऽस्तु ते भूतपते महात्मन् ।
नमोऽस्तु ते शाश्वतसिद्धयोगिने नमोस्तु ते सर्वजगत्प्रतिष्ठित ॥ १॥

परमेष्ठी परं ब्रह्म त्वक्षरं परमं पदम् ।
ज्येष्ठस्त्वं वामदेवश्च रुद्रः स्कन्दः शिवः प्रभुः ॥ २॥

त्वं यज्ञस्त्वं वषड्कारस्त्वमोङ्कारः परन्तपः ।
स्वाहाकारो नमस्कारः संस्कारः सर्वकर्मणाम् ॥ ३॥

स्वधाकारश्च यज्ञश्च व्रतानि नियमास्तथा ।
वेदा लोकाश्च देवाश्च भगवानेव सर्वशः ॥ ४॥

आकाशस्य च शब्दस्त्वं भूतानां प्रभवाप्ययः ।
भूमौ गन्धो रसश्चाप्सु तेजोरूपं महेश्वरः ॥ ५॥

वायोः स्पर्शश्च देवेश वपुश्चन्द्रमसस्तथा ॥ ६॥

बुद्धौ ज्ञानं च देवेश प्रकृतेर्बीजमेव च ॥ ७॥

संहर्त्ता सर्वलोकानां कालो मृत्युमयोऽन्तकः ।
त्वं धारयसि लोकांस्त्रींस्त्वमेव सृजसि प्रभो ॥ ८॥

पूर्वेण वदनेन त्वमिन्द्र त्वं प्रकरोषि वै ।
दक्षिणेन तु वक्त्रेण लोकान्सङ्क्षिपसे पुनः ॥ ९॥

पश्चिमेन तु वक्त्रेण वरुणस्थो न संशयः ।
उत्तरेण तु वक्त्रेण सोमस्त्वं देवसत्तमः ॥ १०॥

एकधा बहुधा देव लोकानां प्रभवाप्ययः ।
आदित्या वसवो रुद्रा मरुतश्च सहाश्विनः ॥ ११॥

साध्या विद्याधरा नागाश्चारणाश्च तपोधनाः ।
वालखिल्या महात्मानस्तपः सिद्धाश्च सुव्रताः ॥ १२॥

त्वत्तः प्रसूता देवेश ये चान्ये नियतव्रताः ।
उमा सीता सिनीवाली कुहूर्गायत्र्य एव च ॥ १३॥

लक्ष्मीः कीर्त्तिर्धृतिर्मेधा लज्जा कान्तिर्वपुः स्वधा ।
तुष्टिः पुष्टिः क्रिया चैव वाचां देवी सरस्वती ।
त्वत्तः प्रसूता देवेश सन्ध्या रात्रिस्तथैव च ॥ १४॥

सूर्यायुतानामयुतप्रभाव नमोऽस्तु ते चन्द्रसहस्रगौर ।
नमोऽस्तु ते वज्रपिनाकधारिणे नमोस्तु ते सायकचापपाणये ॥ १५॥

नमोऽस्तु ते भस्मविभूषिताङ्ग नमोऽस्तु ते कामशरीरनाशन ।
नमोऽस्तु ते देव हिरण्यगर्भ नमोऽस्तु ते देव हिरण्यवाससे ॥ १६॥

नमोऽस्तु ते देव हिरण्ययोने नमोऽस्तु ते देव हिरण्यनाभ ।
नमोऽस्तु ते देव हिरण्यरेतसे नमोऽस्तु ते नेत्रसहस्रचित्र ॥ १७॥

नमोऽस्तु ते देव हिरण्यवर्ण नमोऽस्तु ते देव हिरण्यकेश ।
नमोऽस्तु ते देव हिरण्यवीर नमोऽस्तु ते देव हिरण्यदायिने ॥ १८॥

नमोऽस्तु ते देव हिरण्यनाथ नमोऽस्तु ते देव हिरण्यनाद ।
नमोऽस्तु ते देव पिनाकपाणे नमोऽस्तु ते शङ्कर नीलकण्ठ ॥ १९॥

॥ इति ब्रह्माण्डमहापुराणे ब्रह्माविष्णूकृता शिवस्तुतिः ॥

॥ ब्रह्माण्डमहापुराणम् । वायुप्रोक्तं पूर्वभागः । अनुषङ्गपादः - २।
अध्यायः २६ - लिङ्गोत्पत्तिकथनम् । ३२-५०॥

.. brahmANDamahApurANam . vAyuproktaM pUrvabhAgaH . anuSha NgapAdaH - 2.
adhyAyaH 26 - li Ngotpattikathanam . 32-50..

Encoded and proofread by Ruma Dewan

*Shivastuti by Brahma and Vishnu*

pdf was typeset on November 21, 2023

Please send corrections to *sanskrit@cheerful.com*